# .. dhanvantarI suprabhAtam ..

# ॥ ધન્વન્તરી સુપ્રભાતમ્ ॥

## Document Information

Text title : dhanvantarIsuprabhAtam
File name : dhanvantarIsuprabhAtam.itx
Category : suprabhAta
Location : doc_deities_misc
Author : Ottuur Unni Namboodripaadu
Language : Sanskrit
Subject : philosophy/hinduism/religion/Ayurveda
Transliterated by : Usha Iyer iyerku at gmail.com
Proofread by : Usha Iyer iyerku at gmail.com
Latest update : June 19, 2011
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ધન્વન્તરી સુપ્રભાતમ્ ॥

શ્રી ગણેશાય નમઃ ॥

અસ્મત્સ્તવમ્ જલધિમન્થનઘોષતુલ્ય -
માકર્ણ્ય ભગ્ન નિજયોગસમાધિનિદ્રઃ ।
ઉન્મીલ્ય નેત્રયુગલીમવલોકયાસ્માન્,
ધન્વન્તરે, ભવતુ ભો તવ સુપ્રભાતમ્ ॥ ૧॥

ક્ષીરાર્ણવે ભુજગવર્ષ્મણિ યોગનિદ્રા -
લીનસ્ય નિસ્તુલનિજાત્મસુખોત્સુકસ્ય ।
કારુણ્યતોઽદ્ય શયનાત્ સ્વયમુત્થિતસ્ય,
ધન્વન્તરે, મધુરિપો તવ સુપ્રભાતમ્ ॥ ૨॥

ઉદ્બિભ્રતો નવસુધાકલશં જલૂકાં,
શંખં રથાઙ્ગમપિ પાણિતલૈશ્ચતુર્ભિઃ ।
ચિહ્નાનિ કૌસ્તુભમુખાનિ ચ તત્તદઙ્ગૈર્
ધન્વન્તરે, મુરરિપો તવ સુપ્રભાતમ્ ॥ ૩ ॥

આનીલગાત્ર, કપિશામ્બર, વન્યમાલિન્,
કાઞ્ચીકિરીટકટકાદિ વિભૂષિતાઙ્ગ ।
ધન્વન્તરે ધૃતસુધાઘટ દીનબન્ધો,
ભો ભોતુ તે ભવચિકિત્સક સુપ્રભાતમ્ ॥ ૪॥

આપીનદીર્ઘભુજદણ્ડ મૃગાદિપાંસ,
કારૂણ્યશીતલવિલોચન કમ્બુકણ્ઠ ।
હાસોલ્લસન્મુખ વિશાલ ભુજાન્તરાલ,
ધન્વન્તરેઽસ્તુ ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૫॥

વિષ્ણો, જનાર્દન, મુરાન્તક, વાસુદેવ,
વૈકુણ્ઠ, કેશવ, હરે, જગદીશ, શૌરે ।
ગોવિન્દ, નન્દસુત, કંસરિપો, મુકુન્દ,
ધન્વન્તરે ભવતુ ભો તવ સુપ્રભાતમ્ ॥ ૬॥

પઞ્ચાસ્ત્રકોટિકમનીય કલેવરાય,
પઞ્ચાસ્યસન્નિભવિલોકન વિક્રમાય ।
રાગાદિરોગકુલનાશકૃતેઽસ્તુ તુભ્યમ્,
ધન્વન્તરે પ્રણતવત્સલ સુપ્રભાતમ્ ॥ ૭॥

નામ્નૈવ યો ઝટિતિકૃન્તતિ દોષકોપમ્,

સ્મૃત્યૈવ યસ્સપદિ હન્તિ ગુણત્રયં ચ ।
બાહ્યન્તરદ્વિવિધ રોગહરસ્ય તસ્ય,
ધન્વન્તરે, ભવતુ ભો તવ સુપ્રભાતમ્ ॥ ૮॥

દ્રવ્યામૃતસ્ય કલશાર્ણવ નિર્ગતસ્ય,
જ્ઞાનામૃતસ્ય નિગમાબ્ધિ સમુત્થિતસ્ય ।
રોગદ્વય પ્રશમનાય નૃણાં પ્રદાતુર્,
ધન્વન્તરે, ભવતુ ભો તવ સુપ્રભાતમ્ ॥ ૯॥

અમૃતઘટજવૂકં ચક્રશંખાંશ્ચતુર્ભિઃ,
મસૃણકરસરોજૈર્બિભ્રતે, વિશ્વગોપ્ત્રે ।
ઉભયનરકહંત્રે, નાથ, ધન્વન્તરે, તે,
ભવતુ શુભવરાણાં દાશુષે સુપ્રભાતમ્ ॥ ૧૦॥

મેઘશ્યામલલોભનીયવપુષે વિધ્યુત્ સ્ફુરદ્વાસસે,
શ્રીમદ્દીર્ઘ ચતુર્ભુજૈઃ નવસુધાકુમ્ભમ્ જલૂકામરિમ્ ।
શંખંચોદ્વહતે, કૃપાપ્લુતદૃશે મન્દસ્મિતશ્રીમુચે,
ભૂયાત્ સન્તત સુપ્રભાતમયિ ભો ધન્વન્તરે તે હરે ॥ ૧૧॥

આયુર્વેદવિધાયિન સ્તનુભૃતામન્તર્બહિર્વાસિનઃ,
શ્રીનામૌષધદાયિનો, ભવમહારોગસ્ય સંહારિણઃ ।
નિર્વાણામૃતવર્ષિણો નિજયશસ્સિન્ધૌ જગત્ પ્લાવિતો,
ભો ભૂયાત્તવ સુપ્રભાત મયિ ભો ધન્વન્તરે શ્રીહરે ॥ ૧૨॥

સર્વેષાં સુખહેતવે, ભવ મહાપાથોનિધેસ્સેતવે,
મુક્તિશ્રીજયકેતવે, મૃતિભયત્રસ્તસ્ય જીવાતવે ।
સક્તાનાં સુરધેનવે, વિધિવિમૃગ્યાંઘ્રિદ્વયીરેણવે,
ભૂયાદુજ્જ્વલ સુપ્રભાતમયિ તે ગોવિન્દ ધન્વન્તરે ॥ ૧૩ ॥

શ્રીધન્વન્તરિમૂર્તયે સુરવરૈરુદ્ગીતસત્કીર્તયે,
વિધ્વસ્તપ્રણતાર્ત્તયે ત્રિભુવની સૌભાગ્યસમ્પૂર્તયે ।
કારુણ્યામૃતસિન્ધવે ભવરુજાશાન્ત્યર્થિના બન્ધવે,
તુભ્યમ્ ભાસ્વર સુપ્રભાતમયિ ભો, ભૂયોઽપિ ભો ભૂયતામ્ ॥ ૧૪॥

ભક્તૈર્નિર્મથ્ય માનાન્નવવિધભગવદ્ધર્મદુગ્ધામ્બુરાશેઃ,
પ્રાદુર્ભૂતાય ભક્ત્યાત્મકવયુનસુધાકુમ્ભ હસ્તામ્બુજાય,
સંસારવ્યાધિહંત્રે, નિરુપમ પરમાનન્દ સન્દોહદાત્રે,
ભો ભૂયાત્ સુપ્રભાતં મુરમથન, હરે કૃષ્ણ ધન્વન્તરે તે ॥ ૧૫॥

Composed by OttUr Unni NamboodripAdu
Encoded and proofread by Usha K.Iyer  iyerku at gmail.com

.. dhanvantarI suprabhAtam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*